नं. ५१३६

कात्यायन श्रौत सूत्र
व्याख्यानम्
श्री याज्ञिक देव:

पत्र. ११८ — सं. १८४४

सूत्र पद्धति परिशिष्टं

कात्तीयसूत्रव्याख्यानपंचमाध्यायः

५१२७

5137
F. = 118

यज्ञविधान कात्यायनीसूत्रध्व४

२३४०

•देवकृतंकातीयसूत्रचतुर्थाध्यायभाष्यं॥ १६५

१

श्रीगणेशाय नमः॥ आचार्येणाकृतिमंत्रपाठक्रमेणापोर्ण्ममासादीन्यग्निहोत्रांतानि कर्माण्युक्तानि इदा
नीमकृतिमंत्रपाठक्रमेणैव चातुर्मास्यानि वक्तुं तेषामारंभकालमाह॥ चातुर्मास्यप्रयोगः फाल्गुन्यां॥ चा
तुर्मास्यशब्देन वक्ष्यमाणानि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयसंज्ञानि चत्वारि पर्वाण्यभिधीयं
ते चतुर्षु चतुर्षु मासेषु भवानि चातुर्मास्यानीति कात्यायनेन भवाधिकारि चतुर्मासात् यत्नेनैव वक्तव्य इति वा
र्त्तिकात शप्याग्रपादि या एवं चातुर्मास्यशब्देनाभिधीयंते न करंभपात्रदर्विहोमत्रैयंबकादयोऽनुहोत
प[illegible]कृतः। अथ यद्देव एते चतुर्थे मासि यजन्ते चातुर्मास्यैर्यजन्ते त्याहो चाच्चेमासि पीजेरिति यागसा
मानाधिकरणात्। अत एवात्र यागा एव प्रधानं तु होनयस्तु तदंगं। अस्याधिकतायाः एतत्प्रयोजनं आग्नेयादि
सोर्यातानां यागानां नामधेयं यदि कश्चिद्विस्मृतः समासेन हुत्वा तानसदानस्य विस्मृतस्य सांगोपेतस्य करणं।
नु होति विस्मरणेऽनु समासेन हुत्वा तेतस्याकरणमिति। तदुक्तं कात्यायनेन। प्रधानस्याक्रिया यत्र सांगन

राम
१

क्रियते पुनः। तदङ्गस्याक्रियायां तु नाष्टिर्नैव तत्क्रियेति। विस्मृतमङ्गमपि च्छा समासेः पूर्वं क्रियत एवात
दूर्ध्वं कृतिदानमस्त्रे। अङ्गमपरिसमाप्ते प्रधाने क्रियते इति तत्र्यंतरितं प्राक् समापनात्कुर्यात् इति मानवे
। तेषां चातुर्मास्यानां प्रयोगः प्रारंभः फाल्गुन्यां पौर्णमास्यां भवति। तत्र फाल्गुनीशब्देन गौणी फाल्गु
नीप्रतिपद्गृह्यते। शाखांतरे तथा दर्शनात्। ऋतुमुखे चातुर्मास्ये चातुर्मास्यैर्यजेतेति। प्रतिपद्येव ऋतुमुखं प्र
थमं दिनं। न पौर्णमासी स्यात्। तावपि चैत्रप्रतिपदि वसंतारंभस्योक्तत्वात्। तथा वशाखायनः। फाल्गुन्यां पौ
र्णमास्यां प्रयोगश्चातुर्मास्यानां चैत्र्यां वा वैश्वानरपार्जन्येष्टिः पूर्वस्यां पौर्णमास्यामुत्तरस्यां वैश्वदेवमि
ति। स्वशाखायामपि। अथ पुनः प्रयुंजानस्य एवं फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेत। प्रातर्वै
श्वदेवेनाथ पौर्णमासेनेति। प्रतिपद्येव पर्व विदधाति। कात्यायनाचार्योपि तथाह। फाल्गुन्युपवसथे शुना
सीरीयं प्रातर्वैश्वदेवमिति। वरुणप्रघाससाकमेधेष्वप्यहानि त्वानिर्मेध्याः ग्री पौर्णमासेन यजेत इति

२

पर्वसमनंतरमेवपौर्णमासी·नुष्ठानमर्हतेऽर्थ॥ अपस्तंबः॥ ॥फाल्गुन्यांपौर्णमास्यांवैश्वावैश्वदेवेनय
जेतपर्वस्मिन्पर्वणिपंचहोतारंमनसानुद्रुत्याहवनीयेसकृत्वान्यां मणीयांइष्टिभिनिर्वपतिवैश्वान
रंद्वादशकपालंपर्जन्यंचरूमितिप्रकृत्यहिरण्यंवैश्वानरेदद्यातिधेनुंपर्जन्यायसिद्धेष्टिः संतिष्ठतेप्राची
नप्रवणोवैश्वदेवेनयजेतेत्यादिपंचदशयामेवैश्वदेवमुपक्रम्यसायंदोहांतंकृत्वाश्वोभूतेपात्रसंसा
दनकालइत्यादिनाप्रतिपद्येवपर्वकरणमाह। मानवेपिचातुर्मास्यानारप्समानः एवंपौर्णमासीमु
पोष्याग्नयेवैश्वानरायद्वादशकपालंपुरोडाशंनिर्वपति। पार्जन्यंचरूमिति। प्राचीनप्रवणोवैश्वदे
वेनयजेतफाल्गुन्यांचैत्र्यांवसंतेवानोपवसथेचातुर्मास्येषुकेनयजमानोवापयतइतिप्र
कृत्यापस्तंबसूत्रवत्प्रतिपद्येववैश्वदेवविधानात्। कठसूत्रेप्येवमेवोक्तमस्ति। श्वोभूतेतुल्यमानिवि
परीतादितिश्रुतेः प्रतिपद्येववैश्वदेवपर्वकर्तव्यम्॥ वैश्वानरपार्जन्यौनिरूप्य वन्न॥ इष्टन्वैश्वानर

राम०
२

श्रीगणेशाय नमः॥ आचार्येणाग्नौ पार्जन्यो निरूप्य चातुर्मास्यानां प्रयोगः प्रारंभः कर्त्तव्यः अथ मन्वा
रंभणीया सह विकल्पः। इष्ट्या वैश्वानरपार्जन्यो इष्ट्या न्वारंभणीयेति। एषा स्वांतराणाम्॥ वैश्वान
रो द्वादशकपालः॥ वैश्वानरो द्वादशकपालः पुरोडाशो भवति अत्र वैश्वानर इति विशेषणान्मत्वा
गुणादेवा यत्तद्धितः सो विष्णुक्रान्त्यवद्यतिद्धन्त्वासमानीयसो विष्णुक्रान्तमितिवत्। अतो विशे
षणं गुणिनी देवता अग्निरत्र इष्ट्या आधारस्वांतरेण यादवीनामात्। तथा च काठके पूर्वामुपोष्याग्न
ये वैश्वानराय द्वादशकपालमिति। मनुरपि। एवं पौर्णमास्यामुपोष्याग्नये वैश्वानरायेति।
श्रुतावपि अभ्युदये साम अग्नये वैश्वानराय द्वादशकपालमिति यते। सूत्रकारेणात्रापि इंद्राय द
त्रम एकादशकपालो वैश्वानर इत्येति निर्गुणाए वो क्तः। एवं च मतिय च यत्र मुक्तौ सूत्रे वा निर्गुणां वैश्वा
नरपदस्य वरांतत्र सर्वत्राग्नि गुणिनी देवता अनुसन्धेया॥॥ चरुरुत्तरः। उत्तरः पार्जन्यश्चरुर्भव(

ति। शास्त्रोनरात्। अस्यां चापस्तंबसूत्रे दक्षिणा पठितास्ति हिरण्यं वैश्वानरे दद्या। तिधेनुं पर्जन्ये इति
। वोदकप्राप्ता वान्वाहार्यः प्रमोति। मानवे च षष्ठमेनुरनड्वाश्वदक्षिणेति। इयं द्विहविष्का इष्टिः पू
र्वस्यां पौर्णमास्यां कर्तव्या प्रथमप्रयोगे मासाद्यश्राद्धसमनन्तरं। चातुर्मास्यान्यारप्स्यमान इति प्र
वणादन्वारंभणीयावत्प्रथमप्रयोग एवेयमिष्टिर्भवति न द्वितीयादिप्रयोगेष्विदं वयन्निति वि
पिनक्चातुर्मास्यस्य शङ्खवाक्या। अन्वारंभणीयास्थानापन्नत्वात्। न हि दैवायथा दर्शपूर्णमासा
न्वारंभणीयान हृदेवाभ्यान्न भवति। एवमसावपीति। अतोऽजन्त्वादस्या विस्मरणेऽप्रयोगः। अ
थ वैश्वदेवे पर्वणि हविष्याद॥ आग्नेयः। अग्निदेवत्योऽष्टाकपालः पुरोडाशः प्रथमं हविर्भव।
ति स वा आग्नेयोऽष्टाकपालः पुरोडाशो भवतीति श्रुतत्वात्॥ ॥सौम्यश्चरुः। द्वितीयं हविः सौम्य
श्चरुर्भवति। अथ सौम्यश्चरुर्भवतीति श्रुतत्वात्॥ सावित्रो द्वादशकपालोऽष्टाकपालो वा। त

तीयं हविः सावित्रः सवितृदेवत्यो द्वादशकपालो ऽष्टाकपालो वा पुरोडाशो भवति। अथ सावित्रो द्वादशक
पालो वाष्टाकपालो वा पुरोडाशो भवतीति श्रुतत्वात्। अयं च पुरोडाशः एषु तरः कर्तव्यः। सर्वे वा हविः पुरो
डाशो भवतीति श्रुतेः सावित्रश्यामानुमांस्युपांश्विति वचनादुपांशु भवति॥ सारस्वतश्चरुः सरस्वतीदे
वतात्वा। नतु सारस्वतः॥ पौष्णश्चरुः प्रपिष्टानां पूषदेवत्यः प्रपिष्टानां प्रकर्षेण पिष्टानां व्रीहितण्डुलानां
चरुर्भवति। पौष्णश्चरुरिति श्रवणात्। तस्मात् पौष्णश्चरुर्भवतीति श्रवणात्। एतद्वयं यद्यपि दर्शपूर्णमा
सप्रकरणे पठितं तत्र वपनं नास्ति अतः प्रकरणादुत्कृष्य वाक्यबलेन विकृतौ यत्र वपनं तत्र ये नीते प्राप्य
ते। इदानीमिदं विचार्यते। राजसूये त्रिषंयुक्तेष्ट्यां पौष्णश्चरुरस्ति सोऽपि किं प्रपिष्टानां भवति उत नेति
सन्देहे सत्रेरौ वपनं परिगृह्णाति॥ द्विदेवत्योऽपि नियमसामर्थ्यात् द्विदेवत्योऽपि पौष्णश्चरुः प्रपिष्टानां
नामेव भवति। कुतः। नियमसामर्थ्यात्। द्वयोः समुदितयोर्देवतात्वं यस्मिन् स द्विदेवत्यः। अत्र हि

इत्यर्थितस्य पक्षोऽद्वे वतार्थं। तत्र पक्षो नियमेन पिष्टं प्राप्नोति इतरस्मिंस्तु पाक्षिको नियमः। तत्र कांस्यभोजिन्यायेन नियु-
मानियमयोर्नियमस्य बलवत्त्वाद्द्विदेवतोऽथैन्द्राग्नोऽपि पिष्टानामेव भवतीति प्राप्ते आह॥ ॥ अद्वैविष्टं वो-
भयसामर्थ्यात्। अथवा द्विदेवतं चरुमर्द्धपिष्टं कुर्यात्। कुतः। उभयसामर्थ्यात्। पक्षः पिष्टमितरस्य चापिष्ट-
मिति एवमुभयोरनुग्रहो भवति समर्थता सङ्गतार्थता च भवति। अत उभयसामर्थ्याद्द्विदेवतं चरुमर्द्धपि-
ष्टं कुर्यादिति॥ नन्वेवमर्द्धपिष्टे चरौ पाकवैषम्यं भविष्यति। न विक्लिन्नप्राये पृतण्डुले पुपिष्टानामावापः क-
रिष्यते। तेन पाकवैषम्यं न भविष्यति॥ ॥ सौमापौष्णे दर्शनाच्च॥ किं च। सौमापौष्णे चरौ द्विदेवते नेमपिष्टता-
दर्शनाच्च द्विदेवतोऽपि नेमपिष्टानां भवति। नेमपादृष्टेर्द्धशब्दस्यार्थो। यो नेम इत्यर्द्धस्येति यास्कोक्तेः। तथा
च दर्शितं। सौमापौष्णं चरुं निर्वपेन्नेमपिष्टानां पशुकाम इति। न चैवं वाच्यं वचनमेतन्न दर्शनमिति। वच-
ने हि सति वाक्यभेदः स्यात्। सौमापौष्णं चरुं निर्वपति तं च नेमपिष्टानामिति। तस्माद्द्विदेवतमर्द्धपिष्टं कुर्यादि-

तिप्राप्त आह ॥ अपिष्टो वा देवतान्यत्वात् ॥ वाशब्दः पूर्वोक्तपक्षद्वयनिरासार्थः । द्विदेवत्ये ऽपि पिष्टं कुर्यादिति प्रा
प्त आह ॥ चरुरपि पिष्ट एव भवति । न प्रतिष्ठानो नाथ द्वौ पिष्ट इति । कुतः । देवतान्यत्वात् । केवलान्यत्वमस्य सकाशात्
सद्वितीयस्य पक्षो देवतान्यत्वात् । केवलो ऽस्त्वन्यः । सद्वितीयो ऽन्य एव । केवलस्यैव पक्षः । अपिष्टो नाम चरुर्भवती
त्युक्तं । न सद्वितीयस्य । तस्मादपिष्ट एव द्विदेवत्ये ऐन्द्रापौष्णश्चरुर्भवतीति सिद्धान्तः । कथं तर्हि दर्शनमित्यपे
क्षायामाह ॥ सौम्यापौष्णवचनात् । सौम्यापौष्णवचोपाने ऽपि पिष्टतासाधवनात् । अतस्तद्दर्शनबलेनान्यत्रेने
ऽपिष्टता साधयितुं न क्यते । विशिष्टविधानाद्वा वाक्यभेदो ऽपि न भवति ॥ एतानि सर्वत्र । एतानि पंचहवींषि सर्व
त्र सर्वेषु पर्वसु भवंति । सर्वशब्देन वरुणप्रघासा महाहविः शुनासीरीयं च गृह्यते । एतेषु हि कृतोपं पंचहवींषि
ऽप्यंते । अथैतान्येव पंचहवींषि भवंतीति अस्पष्टेषु सर्वेषु कृतत्वात् ॥ मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः । पर्यंते हवि
: मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः पुरोडाशो भवति । तव इति बलनाम । स्वं तवो येषां ते स्वतवसः । स्वतवस इति वि

५

शेषशं मरुद्भ्य इति विपर्ययं। अस्य च प्रमहरणानुवाचनादौ मरुद्भ्यः स्वतवोभ्य इति प्रयोगः। कार्ये मारुतस्तु सप्तक
पाल इति प्रकृत्य। तं वै स्वतवोभ्य इति कुर्यादिति श्रुतेः स्वतवद्भ्य इति तु छांदसं रूपं मारुतो वा। अथवा मारुत
ः मरुतो देवता यस्य सो मारुतः। सप्तकपालः। पुरोडाशो भवति। अथातः पयस्यायाग्वायतन मारुतस्तु स
प्तकपाल इति श्रवणात्। स उ खलु मारुत एव स्यादिति च।। वैश्वदेवी पयस्या। सप्तम्यं द्विवैश्वदेवी पयस्या
भवतीति विश्वेदेवा देवता अस्याः सा वैश्वदेवी। इयं वोपांशु। वैश्वदेवी चातुर्मास्येष्वपांशुर्भवतीति प्रागुक्तला
त्। अस्यां च दाक्षायणापयस्यायां धर्मप्रवृत्तिः।। अतश्चावाग्न्याधानानंतरं शाखाच्छेदनानुमार्जनपरिवास
नोपवेषकरणपवित्रबंधनवत्सापाकरणा विश्वेभ्यो देवेभ्यो भागमिति गोः स्पर्शनं शाखोपगूहना निरू
प्याग्रहणवरणादि निरुप्याग्न्यो दोदकृत्वा तमे पयसि दधिप्रक्षेपो दधनि वा दोहः। तत्र स्थाल्यभिघारमदत्त्वा वा
वाजिनं निषेकादि तस्या व्यरेसादनं वाजिनयागोपि भक्षांतो भवति। अथातः पयस्येति प्रकृत्य तस्मा

दा०म०
५

द्वैश्वदेवी भवती ।ति श्रुतेः। द्यावापृथिवीय एककपालः। अथ मंहविर्धावापृथिवीय एककपालः पुरोडाशो
भवति अथ द्यावापृथिव्य एककपालः पुरोडाशो भवतीति ब्राह्मणात्। अयमच्छ पांशु भवति। एककपालत्वात्।
एककपाला श्चावाहरणाद् इति श्रुतत्वात्। एवं चात्र त्रीणि हवींषु पांशु भवंति। सावित्रः वैश्वदेवी द्यावापृथिवीय
श्चेति। अत एवं श्रूयते तेषां वै चतुर्णां द्वयोस्त्रीणि त्रीणि हवा०. प्यनिरुक्तानि भवंति द्वे द्वे द्वयोरिति वैश्व
देवे अन्ये त्रीणि। मध्यमयो द्वे द्वे इति। अचाहापस्तंबः। अलंकरणकाले आज्येनैककपालमभिपूरयत्याविः
पृष्ठं वेति। एवमाचार्येणापस्तंबेन निबद्धं। उद्धृत्यातां प्रच्छादयेदाज्येनेति। एतद्वैश्वदेवं। एतदाग्रयाणेष्टि हवि
ष्का कर्म वैश्वदेव संज्ञकं भवति। संज्ञाकरणं संव्यवहारार्थं॥ प्रजाकाम स्यापि वैश्वदेवमित्यादौ प्राची
नप्रवणे। प्राचीनप्रवणं निम्नं यस्मिन्न सौ प्राचीनप्रवणो देशः। तस्मिन् प्राचीनप्रवणो देशे वैश्वदे
वं पर्व भवति। प्राचीनप्रवणे वैश्वदेवेन यजेतेति शाखान्तरात्॥ अहतवासाः। अस्मिन् वैश्वदेवपर्वणि।

८

6

यजमानो हतवासा भवति। अहते वाससी यस्याः सा अहतवासाः। एकं परिधानीयं। द्वितीयमुत्तरीयं। परिधास्या इति परिधानमंत्रः॥ यजमानोत्तरीयस्य परिधानानन्तरं द्विराचमनं चाङ्गत्वात्। आगे वै तत्परिधानं कर्त्तव्यं॥ पत्नी चाप्यहतवासा भवेत्। अस्या अपि परिधानीयमुत्तरीयं चेति द्वे वाससी भवतः। तद्वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातामिति वचनात्॥ ॥ ते एव वरुणप्रघासेष्वपि। ये वाससी वैश्वदेवेन यजमानयोर्वाससी उपवेशितापत्नीयजमानाभ्यां परिहिते ते एव वाससी वरुणप्रघासेष्वपि भवतः। क्वाचित्कनियमो यं। तद्वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातां ते एवात्रापि स्यातामिति वचनात्। वैश्वदेविकानां नाम्नादोषाद्दावनस्पोरप्रव हराप्रघासे परिधानं कर्त्तव्यं। हानं च॥ ॥ त्रेधा बर्हिः संनह्य पुनरेकधा॥ बर्हिः पर्वैत्रेधा त्रिविधं संनह्य एकैकेन संनहनेन एकत्रीन्पूलकान्बध्वा पुनरेवाधा एकविधं संनह्येत्। त्रीन पिपूलकानेकेन चतुर्थेन महता संनहनेनैकत्र बध्नीयादित्यर्थः।

राम० ८

अथातश्चारुदेवनोपकिरंस्कन्तरवेदिमितिप्रकृत्यत्तेधावर्हिः संनद्धं भवतीतितस्पुनरेकधेतितस्मात्त्रेधा
सन्पुनरेकधेतिचश्रुतत्वात्॥ कुशाग्रस्वःप्रस्तरउपसंनद्धः। मैवंतिं कुशप्रस्वःप्रसूताःपुष्पिताःकुशास्त्वर्भमं
जयेः प्रस्तरोत्र भवति। कीदृशः उपसंनद्धः। उपवर्हिषः समीपेसंनद्धः वद्धो भवति। चतुर्थंसंनहनमध्येसो
पिवद्धोभवतीत्यर्थः। प्रस्तरउपसंनद्धोभवेतितेप्रस्तरंउद्धातितेस्मात्प्रस्तरःप्रस्तरंउत्सृजतीतिश्रवणात्॥
आसाद्याग्निमंथनं कर्त्तव्यं। आसाद्यहवींष्यग्निमंथतीतिवचनात्॥ प्रकृतौहिहविरासादनानं
तरंहविशलेभात्मले भोदकस्पर्शनानिविहितानिसंति। अत्रवहविरासादनानंतरमग्निमथ
नात्तत्रप्राकृतेचनिकृतावृत्पत्तेनन्यायेनहविरासादनानंतरंप्रथमेहविशलंभात्माल भोदकाले
भात्कृत्वाग्निमंथनंकर्त्तव्यं॥ अथाग्निमंथनमस्येतिकर्त्तव्यतामाह॥ अग्नेर्जनित्रमसितिशकलमादा
यवेधां करोति। अग्नेर्जनित्रमित्यनेनमंत्रेणायज्ञियवृक्षशकलमादायतत्संवेधामुदगग्रं करो

६

7

ति निदधाति। सोऽधिमंथनं० शाकलमादत्ते अग्नेर्जनित्रमसीति प्रकृतत्वात्॥ वृषणौ वितिकुपान्त कुशोत
स्मिन्नाह वृषणौ स्थ इति मंत्रेण तस्मिन् शाकलं कुशतरुणौ दर्भं कुशौ प्राग्ग्रे निदधाति। अथ दर्भ
तरुणकौ निदधाति वृषणौ स्थ इति प्रकृतत्वात्॥ मानवे तु उत्तरस्मापप्स्वात्य सिद्धिं संधेरग्नेर्जनित्र
मसीत्यधिमंथनं शाकलमवस्थापयति। वृषणौ स्थ इति तत्र प्राञ्चावपि छिन्नप्रान्तौ दर्भौ तु उर्वश्य
सीति तयोरुदक्कूलं मरणिं पश्चात्त्वजननात्तु आरणिं मायुरसीति आज्यस्थाल्याविलत्सा
हयने त्रिः समनक्तेत्यादि। आपस्तम्बोऽपि प्रावोदर्भौ विति॥ उर्वश्यसीत्यधरारणिं तयोः तयोः
स्तेतयोः शतकुशायोरुपर्युत्तराग्रामधरारणिं निदधाति। उर्वश्यसीति मंत्रेण। अथाधरारणिं
निदधीत उर्वश्यसीति प्रकृतत्वात्॥ आयुरसीत्युत्तरयाज्यस्थाल्याम्० समस्योर्वश्यपुरूरवा इत्यभिनिधानं
तया। आयुरसीत्यनेन मंत्रेणोत्तरारणिमप्रथमस्थलेनाज्यस्थाल्याम्० समं० स्पृशपाज्यस्थाली

रामं०
१

स्फमात्रंपस्पृष्ट्वा पुरूरवा असीत्यनेन मंत्रेण गोत्तरारणा निनिधानं । अथ धरारणोकृपरिनिधानं करोति । अ
घोत्तरारणाज्य बिलापनीरूपस्पृश्यायुरसीति तामभिनिदधाति पुरूरवा असीति उक्तत्वात् १ अग्न
ये मथ्यमानायानुवाचयति । मथ्यमानायाजेत्यनुवाचनं होत्रा कारयति । तच्चाग्नये मथ्यमानायानु
ब्रूहीत्येवं । अपाहाग्नये मथ्यमानायानुब्रूहीत्युक्तत्वात् । अत्राहापस्तंबः । अग्नये मथ्यमानायानु
ब्रूहीति संप्रेष्यति मथ्यमानायानुब्रूहीति वेति ॥ मंथयति गायत्रेणेति मंत्रं त्रिः प्रदक्षिणं । ततो धर्षु
र्यो यत्रेणेति मंत्रं प्रदक्षिणं त्रिर्मथति अनुद्दिष्टं प्रदक्षिणं चाप्रदक्षिणं च । समंथति गायत्रेणात्वा
र्हं इहसाद्यत्यादि उक्तत्वात् ॥ जाते जातायेति । जाते ग्नौ जातायानुब्रूहीत्यनुवाचयति । जातायानुब्रूहीत्या
ह यदाजायत इति उक्तत्वात् ॥ प्रह्रियमाणायेति प्रास्यन् । अग्नावग्निं प्रास्यन् आहवनीये ग्नौ जातस्याग्नेः
प्रक्षेपं करिष्यन् प्रह्रियमाणायानुब्रूहीत्यनुवाचनं होत्रा कारयति । प्रह्रीयमाणायेत्यनुप्रह

८

रन्निति श्रुतत्वात्॥ भवतं नइति प्रास्यति। भवतं न्नइति मंत्रेण ग्रावग्निं प्रास्यति आहवनीयस्थं जात
मग्निं प्रक्षिपत्यर्थः सोनुप्रहरति भवतं न्नइति श्रुतत्वात्। अत्र यज्ञपतिशब्देन के यजमानके वि
परिणाम्यते। मा यज्ञपतीं जातवेदसाविति हि यजमानके मा यज्ञपतीं जातवेदसाविति वह्नेषु
॥ अग्नावग्निश्चरतीति जुहोति स्रुचाल्याः स्रुवेण। अग्नावग्निरित्यनेन मंत्रेण स्रुचाल्याः सकाशात् स्रुवे
णाज्यं जुहोति प्रास्यत्स्याज्ये रूपपरिच्छेदमग्निभ्यामित्याभागः। अथ स्रुवेणोपहत्याज्यमग्निमभिजु
होत्यग्नावग्निरिति श्रवणात्। एवमंत्तमग्निमथनं ततो होतुरामंत्रणादि॥ नेवप्रयाजेन वानुयाजं
वैश्वदेवं भवतीति शेषः। न वप्रयाजाय स्यात्तन्नेव प्रयाजं। नेवानुयाजाय स्यात्तन्नेवानुयाजं। वैश्वदे
वे पर्वणि न वप्रयाजन वंति। अनुयाजा अपि न वु भवंति। नवप्रयाजं भवति न वानुयाजमिति श्रु
वणात्। अत्र च पंचमप्रयाजस्याभ्यासेन नवसंख्यापूरणीया। उत्पन्नाभिधानत्वात्। ततश्च पंच

राम०
८

मवष्ठस्म समाप्य मनवमानां पंचममित्येनेनैवानुमन्त्रणां। पंचमस्य स्थाने होमइति। पं
चमस्कंदं ह्याभ्यइतित्याग:। इदमुपासानस्कोभ्यामितिषष्ठस्य इदं दैव्याभ्यां होतृभ्यामिति सप्तमस्य
इदं तिसृभ्योदेवीभ्यइत्यष्टमस्य स्थाने चमस्यानुकृष्णाहि सर्वदेवताभ्यो पान्यामध्ये पठिताभ्यइति॥ वरु
णप्रघासामहाहविष्ष्ववरुणप्रघासानवप्रयाजानानानुयाजाश्च भवति। महाहविष्ष्वनवप्रयाजं भ
वतिनवानुयाजं च। उभयत्रेतत्याकृतत्वात। वरुणप्रघासे मावरु। आम्नामाध्वर्युरेवाह समिधोयजेति
यज्ञयजेति चतुर्थेऽयाजे समानयमानोनचभिरनुयाजैश्चरतस्तस्मिन्नवप्रयाजेभवतिनवानुयाजे
ःप्रयाजैश्चरतइतितथादेवान्यजेतियज्ञयजेतिचतुर्थे चतुर्थे चतुर्थेऽयाजेसमानयमानोनचभिरनु
याजैश्चरतस्तद्घन्नवप्रयाजंभवतिनवानुयाजमिति। महाहविष्यपि। महाहविषा ह वै देवाइतिप्रक्रम्य तस्मा
हादित्यस्यौकेडिकायां नवप्रयाजं भवति नवानुयाजमितिश्रुतत्वात्। ननु वैश्वदेवधर्मित्वेनैव नवप्र

८

१

याजमानादिसिद्धेः वरुणप्रघासासमहाहविष्ष्वित्यादिसूत्रे न कार्येः सत्यं नित्येष्टेः पंचम्योपिकानां हविषां न

वपयाजताादिसिद्धं बंधविधानार्थं पुनरुक्तमित्यदोषः ॥ तथा च माहत्याच्चपि नवप्रयाजता भवन्ति इति एवं वा

रुणप्रघासेन कार्यमाहिद्वैविध्यकर्मणां नां विस्मरणोच समाप्तिरुद्धं यदा ते षां पृथगनुष्ठानं सांगक्रियाणि

नदा तेषां नवप्रयाजता नवानुयाजता भवति । इतरथा च न स्यात् । वैश्वदेवधर्मणां पंचभिर्हवि

र्भिर्वसंबंधात् ॥ त्रीणि समिष्टयजूंषि जुहोति देवा गातु विदो पत्नयज्ञमेषत इति त्रीणि समिष्ट

यजूंषि [illegible] जुहोति देवा गा चो विद इति प्रथमं । यज्ञ [illegible] मिति द्वितीयं । [illegible] इति तृतीयमिति ।

त्रीणि समिष्टयजूंषि भवन्ति न्याय्यद्वहीदः हविर्धानादि [illegible] त्वा तात्रयाणां क्रमेण । इदं वा

या इदं पत्नाय इदं यज्ञपतय इति । पत्यामोः । [illegible] योम्यासेन संख्याप रणा उ. पुन्न पोगच्छस्व्या पाः

[illegible] नैक यजमानकेवोतः । यज्ञपतीगच्छेति द्वयोः यज्ञपतीनाच्छेति बहुषु [illegible] यज्ञोयपतीः इति [illegible]

रा०म०

८

यज्ञपतययग्रइति च॥ ॥पशौ चापशावप्येतान्येकत्रीणि समिष्टयजूंषि जुहोति। तस्मान्तस्य पशो
समिष्टयजूंषि न जुहोतीत्यग्नीषोमीयसमिष्टयजुषां प्रतिषेधान्नदितरपशुषे तत्समिष्टयजु
षां त्रित्वं विधीयते पशौ विकल्पमन्त्रांतरवाचामाह॥ यांआवह इति चापशौ॥ यांआवह इत्यादिभिर्वा
त्रिभिर्मन्त्रैः पशौ त्रीणि समिष्टयजूंषि जुहोति। यांआवह उशत इत्यादि देवा गातुविद इति॥
अत्र पूर्वयोरिदं नमयइति। तृतीयस्य देवा गातुविद इति॥ एकं यांविष्टं देवे। वैश्वदेवे पर्वणि एकं वा स
मिष्टयजुर्जुहोति। अयो अप्येकमेव स्याद्विधिर्यज्ञो हीति। तहिं देवा गातुविद इत्यनेन मन्त्रेणाव
हसामयासामहाहविष्टयजुर्जुहोति। अयो वास्त्रीणीयथोवै श्वदेवे इति विशेषो पदेशात् पुनस्त्री स
ये वैका मवास्यात्क समिष्टयजुरिति तत्र आवरणात। अत्र तस्य प्रथमजो गोदक्षिणेति प्रयते। यज
मानस्य गोष्ठ प्रथमजातः प्रथमजन्मतरुं प्राकृप्रथमजो गौर्दक्षिणा वैश्वदेवस्य चेति॥ ॥पर्वस

स्वर्णासुवपनं वा प्राग्गत्वा तापर्नेस्व ७ · स्वर्णासु प्राग्जंन्तु तत्त्व रागस्थ यागां संस्थासु समा भिषुकनीपवृंगी
ते यज्ञमानस्य वपनं वा भवति अथात: परिवर्तनमेवेति भिन्न लक्ष्यस पूर्हेष्वदेवनयजमानेत्रिनैवेतदि
त्यपूर्णा कंडिकायां तत्र अनीशल्लल्ली भवति लोहः स्तुरस्तेन परिवर्तयेत इति अथ यदूरामघा
से यजेत अथ यत्साकमेधैर्यर्जेतेन केशश्मश्रू रांलोत्यनपोरपिकंडिकयां लोहः स्तुरस्तेन परि
वर्तयेत इति अनन्तर त्यावेतारिवति वपनं स्तुक्त तन्वान प्रागत्वादि त्युक्तो परिवर्तनेव केशश्मश्रू रां
वपनं मुंडनमुच्यते। शारवांतरस्त्रेषु पौर्णमासे स्वनंतरं वपनं विहितं नन्वाचकाठके। पौर्णमासे
द्वापरिवापयेत लोहायस्तेनस्तुरेणेति मा नवत्वा सघः पौर्णमासी संस्थाप्यात्रिष्वेनयाशल्लल्या
लोहायसेनस्तुरेणा निवर्जयति केशान्वपति श्मश्रूणाइति॥ ॥अपि संवापि॥ अथ पौर्णमासे
द्वाप्रसृतं नैसरइत्यपाप्यायाशल्लल्येरस्तुकांडेने स्तुघाल्लाकपावालो ह्रनच स्तुरेणोडवरेणा ८

केशान्निवर्त्तयेत्वपयेत्तश्मश्रूणीति। अथवपनस्येति तिकर्त्तव्यतामाह। अथ रेणादक्षिणाग्नि
दक्षिणांगोदानमुंदतिसवि आप्रसूताहैव्या आपउदंतु तेन त्वं दीर्घायुत्वायवर्चसइ तितनोद
क्षिणाग्निमपरेणादक्षिणाग्नेरपरस्यांदिशिप्राङ्मुखोपविष्टस्य यजमानस्य दक्षिणांगोदानं
यनकालिगृषि ष्टिष्वांदीयतेनि धीयतेस्थाप्यतइतिगोदानं दक्षिणाकर्णसमीपवर्तिशिरःप्र
देशमित्यर्थः। तमुंदति ऊ दीर्घाहने।अभिः। केदयाति। आर्द्रं कशैतिमन्त्रवित्रेत्यादिनामन्त्रेणोदकअ
खण्डपविष्टोधर्मः॥ अस्यापालल्यावीनीयत्रीशिकुशान्तरूणान्यंत ईषावत्यैषबद्धा॥ पालल्यानि
न्वान्केशान्विनीयएष्यकृत्यविजरान्कृत्वात्रीशिकुशाकरूणानि दर्भात्तगान्यंतर्दधाप्रान्नैषधत्राय
स्वतिमंत्रेण।अनेनीशलेलीमवतीति मन्तः। त्रिषुस्थानेषुपनीष्वितानुकनुराये नी। शललीसेधाप
लाका। प्वाविविड्भा। त्रिष्वितयेतिस्थानेतरे। स्वस्मीदन्तुदान्तानाय यानेन हनि ड्षौ प्रूतकारस्यचनेका रः।

एतशब्दः कर्बुरत्वस्मिवाची अनुदात्तोंतस्सोपधः॥ त्र्यायुषमिति यजमानो जपति। ततो यजमानस्यायुषेत्रा
मदग्नेरित्यमुं मंत्रं स्वरेण जपति॥ ॥शिवो नामेति लोहक्षुरमादाय हस्तेन गृहीत्वा निवर्तयामीति
मंत्रेण केशान्वपति। अपात्शांतहिंतान् केशान् छिन्नत्तीत्यर्थः। तशाना मपछेदनं कर्त्तव्यं। स
केशानि प्रछिंधीति कचिद्दर्शनात्॥ लोहमेवमात्रमुच्यते। लोहितइवत्यग्निरिति वचनात् तानद्दा
लोहः लोहपरिस्कृतः। मरुद्देशोनादेशस्यैव प्रसिद्धत्वाद्वपनसामर्थ्याद्वा। लोह इति मनुलोपि नाम
देशः इति हरिस्वामिनः॥ एवं पश्चादुत्तरतश्च। यथादक्षिणगोदानेस्योदनादिवपनांतमुक्तं। एवमे
वपश्चादुत्तरतश्च कर्त्तव्यं। पश्चाद्गोदाने शिरसः पश्चादुत्तरतश्च। यथादक्षिणेद्वाद्वपनसाम
गोदानस्योदनादिवपनांतमुक्तं। एवमेव पश्चादुत्तरतश्च कर्त्तव्यं। पश्चाद्गोदाने शिरसः पश्चाद्देशो
उत्तरगोदाने उत्तराभिमुख शिरः प्रदेशो चेत्यर्थः। जपक्षुरदानयोरभावं कृतत्वात्। अत्र न्यासर्वे समं

त्वंकं भवति। उदंतां केशानां विनयनं दर्भेश्शांतर्ज्ञानां छेदनमिति॥ गृहेषु पौर्णमासस्य समारूढ नि
र्मथितयोस्तथा चेत् ततः पर्वकस्ताप्रदेशाद्रागत्य गत्य गृहेषु समारूढ निर्मथितयोरग्न्योः पौर्णमा
सकर्तव्यात यो चेदिति चेद्विधितथा कृतं भवति समारूढ निर्मथितयोः पर्वकृतं भवति। मध्ये पर्व समाप्स्य ने
तरं समारूढ निर्मथितयोः पौर्णमासं कर्तव्यं नान्य चेत्यर्थः। तत्र चतुर्दश्याम् पर्वणांमध्ये कृतः साम्यपा
सः साकमेधाग्रो देवतायसमारूढ निर्मथितयोः कि पंतेः। तत्र वास्तवसाय वर्ते त नयजते इति प्र
तेः। नचागृहे सतित्वा निर्मथ्यान्यौ पौर्णमासेन यजेत इति वरुणप्रघासांते साकमेधांते वा कर्तो
नवैश्वदेवे पशुनासीरीययोरंतेः अतो वरुणप्रघासे साकमेधे समाप्स्य नंतरमेवाग्नी समारोप्य
गृहमागत्य मथित्वा तत्कालमेव सद्यः पौर्णमासं कर्तव्यं वैश्वदेवान्ते प्राचीनप्रवणाद्देशादेव
स्वस्थाने नीत्वा पौर्णमासेष्टिः कर्तव्येति। साकमेधानंतरं समारोप्य निर्मथ्य तत्रैव शुनासीरी

१२

12

यं कृत्वा गार्हपत्यं स्वस्थानमानीय पौर्णमासं कर्तव्यो फाल्गुन्यां ह्येव शुनासीरीययागे चैव । मेव'
पक्षान्तरे शुनासीरीयान्ते पौर्णमासस्य प्रसंग एव नास्ति ॥ प्रजाकामस्यापि वैश्वदेवं । प्रजां का
मयते वा यक्ष्यतीति प्रजाकामः । प्रजाकामः । प्रजाकामस्यापि यजमानस्य वैश्वदेवपर्व केवलं भ
वति । सयः प्रजाकं पयएतेन हविषा यजत इति श्रुतत्वात् । एतेनेति वैश्वदेवेनेत्यर्थः ॥ एके
धः प्राङ्शायी । सदा स्वर्तुजाप्योयायी मा.. सर्वस्वन्तानि वर्जयेदुदकाभ्यवायं च प्रागवभृथात् ।
एके शाखिन एवमाहुः । चातुर्मास्ययाजी वैश्वदेवानन्तरं यजमानोऽधः प्राङ्शायी स्यात् । अथ इति
स्वरसिद्धतास्मये स्यानीचैः । नत्वनास्तृतायां भूमौ प्राङिति प्राक्शिराः शेते । तथा मध्वाशी भवे
त् । मधुनामिश्रमन्नमश्नीयात् । तथा ऋतुजायी पापी स्यात् । ऋतुकालेऽप्येव जायां स्वभार्यामु
पगच्छेत् । नान्यदा । अथवा ऋतुकाले जायामुपेयाद्देवं न कदाचित्प्रमादान्नोपेयादिति ।

राम०

१२

नयामांसंस्त्रियंचान्नंतंवर्णनानिवर्जयेत्।मांसंभोजने।स्त्रियंस्तुरतसंभोगेऽत्रऋतुकालादन्यत्र
।ऋतुकालेतुविहितत्वात्।अन्नंतमसत्यं।चानुमीस्यसमाप्तिपर्यन्तमेतेनियमाभवंति।उद
काभ्यवायः।उदकमध्येप्रवेशः।तंचवर्जयेद्वैश्वदेवमत्याग्न्याकं।वरुणप्रघासेतुतेस्त्ववभृथोभवति।त
तःप्राग्यजमानेनोदकमध्येप्रवेशोनकर्तव्यइति।एकेत्रइणाद्येषांसर्वेषामधःशयनादीनां
विकल्पः।केचिदेकइतिपदंपूर्वेसत्रेणासहयोजयंति।प्रजाकामस्याग्निवैश्वदेवमेकइति।
नानेनातेषांमतेऽधःशयनादीनांनियोगतोऽनुष्ठानंभवति।एतेनवैप्रजापतिरित्यस्याःकण्डि
कायांहरिस्वामिभिरेवंव्याख्यातं।यःप्रजाकामइत्यपक्रम्यदेतां।एवैप्रजापतिःप्रजायजतइ
तितिवैश्वनाप्रजाकामस्यपृथग्वैश्वदेवंभवतीत्येकेमन्यंतइति।सत्रकारआह।उत्तरेषु
पर्वभिःसहैकत्वात्कथनादर्थनाहुत्तरेषुविवितिसमुदायातगतिस्यैवापृथक्त्वमतस्यैतत्फलमिति

स्वयंनस्पेतो। इदमेवात्रयुक्तं। अन्यथातुवहुराभपयासाद्यपिप्रजानामारोप्यायप्रथकत्वालाएवस्कः।सा
कमेधाश्चद्विवत्तांपराजयायातस्माद्वयुत्पवादमात्रमेतदिति। अस्यापिमतेवःशयनादीनांनि
योगतोनुष्ठानेननविकल्पइति। एकेत्वहशास्यपूर्वसत्रेणासंवंधात्। तथाचाहापस्तंवः। तस्यपर्वसं
तरालव्रतानिनमांसमश्नातिनस्त्रियमुपैत्यृतौवाजायांनोपर्यासेतजुगुप्सेतेऽन्ततात्। अदुःशेत
मधश्नातिमधशनःस्यादित्येकांतमंत्रनार्थमित्यपरमनुयाजन्यश्चातुर्मास्ययाज्यन्यावसंतोम
त्वाहडभत्तृष्टादभ्रदिति यजतेसरूतुयाज्यप्रथमश्चतुर्षुवतुर्षुमासेषुसचातुर्मास्ययाजीव
संतेवैश्वदेवेनयजेत प्रावृषिवरुणप्रघासैः शरदिसाकमेधैरितिविज्ञायते॥ काठकेच॥ वसं
तासिति।मानवेचाचतुरोमासान्नमांसमश्नातिनस्त्रियमुपैतिनोपर्यास्तेजुगुप्सेतानृतात्। प्राङ्
तिमध्वश्नात्यतोभार्यामुपैतीति। उक्तंवैश्वदेवसंज्ञेपर्वण्यधुनावरुणप्रघासानाहमि॥ आपा

उ

आम यंते योनिरिति समारोपो देव सायनिर्मथ्य वहरणप्रयासाः आषाढीशब्दे नात्र गौणीप्रतिपदु
क्ते। अस्तु मुख्यैव मुख्ये घां उमीसौर्यजेते निशारं वा तच्छक्तत्वात् प्रतिपदे क्रमुमुख्ये। न पंचदशीनि तत्रा
षाढ्यामाषाढश्रुतेः प्रतिपदि वहरणप्रयासा भवति। किं कृत्वा अयं ते योनिरिति मन्त्रेणाग्रहं यत्वाह
वनीयाद्वकी अरण्योः समारोप्य प्रतपनेनारण्योरारूढं कृत्वा। अर्थादेव एवं तस्मादाहवनीयमुद्धृत्य
प्रतिकर्मोद्धरणप्रसङ्गाद् दुष्कत्वात्। पुनराधानादिनिमित्ते न नि त्यमेवैतस्यैव समारोपः। कृत्वर्थे
न समारोपेणाप्रूपार्थस्य नित्यधारितस्य वाधात्। समारोपविस्मरणेऽचाथ्र्पूर्ववं ऊल्म प्रागोपदेशि
कांगप्रधानाद्धूतिं करणानन्तनकर्द्धु। तत्र रविः प्रयाणादि यत्कृतं तत्कृतमेव गुणलोपादनादि
ष्टं तन्निमित्तं भवति। विहितेषु चेद्दि हितानन्तरी समारोप्य निर्मथ्य पुनरुद्धरणाधानप्रणयनाग्न्याधा
नादिकार्यपरिस्तरणामाहवनीयकल्पनं परिधिपरिधानस्य श्वा नुपस्य द्वयोराधानं नास्य पंतेरिति

१४

14

जपः सामिधेनीप्रैषः सामिधेन्यनुवचनं इध्माधानं ऽपवाजनं संमार्गमित्येते संस्काराः पुनः कार्याः। त
तऽ द्वसाय स्वस्थानाद्देशांतरे प्राचीनप्रणेगन्वाततस्तत्र प्राचीनप्रवरो गार्हपत्यं निर्मथ्य स्थाप
यित्वा ततस्त्र आहवनीयदक्षिणाग्नी च चित्वा त्यवरूणा प्रसाः कर्तव्या इत्यन्वयः। न्वाधानामपंतेया
नि इति समारोपोत्वेत्यत्र समारोपस्य मंत्र उक्तः। किं समारोपात्वेत्यपेक्षायामश्रीन् कुत्वः समारोत्या
ग्नी शालापरे न मंथित्र दर्शनात्। ततः क समारोपात्वेत्यपेक्षायामसरीणारित्ति कुतः। यामे वा वि वक्ते
न्मारणा रत्यत्रारणेपः समारोह शादर्शनात्। एवं च सत्यत्र येणा खिलः समारोपः सिध्यति क चिन्मंत्रः।
क्वचिदग्नौ। क्वचिदरणौ इति। तत्रापि प्रथमं गार्हपत्यस्य समन्मंत्रेणा द्विस्तन्स्तीति त एवमेवाह
वनीयस्य। कुतः। शांखायनसूत्रेस्य विशेषस्य दर्शनात्। तथाह श्रूयते यो निशितिवारणीप्रत प्यन्ति
सन्नमंत्रेणा द्विर्द्विः सत्रस्नीमेवाहवनीयादिति। ऽ द्वसाये त्वनुत्पर्वो वस्य तिः प्रदेशांतरगमने वन्नाजे।

राम०

१५

तेनोद्वसापस्वस्थानान्मदेशांतरे गत्वेत्यर्थः। एवंविकद्वेशिराग्नौ निस्तुषाममष्टयवानांकरंभ
पात्रकरणं। एवं करितिपत्नीपकालात्मनि पदः एवं वीस्मिन्द्विने पंचदशपादशि भवैति राग्जे।
निस्तुषाममष्टयवानांकरंभपात्रकरणं भवति। निर्मुक्तास्तुषेभ्यो निस्तुषाः। आमा अपक्वाः। भ्र
ष्टाः पक्वाः। आमाश्च ते भ्रष्टाः ईषद्दग्धा इत्यर्थः।। न त्वपरिपक्वापक्वा दामाइत्यर्थः। किंचित्पक्व
त्वाच्च भ्रष्टा इति। निस्तुषाश्च ते आमभ्रष्टाश्च निस्तुषामभ्रष्टाः ईषद्दग्धा इत्यर्थः।। न त्वपरिपक्वाप
क्वा दामा इत्यर्थः। किंचित्पक्वत्वाच्च भ्रष्टा इति। निस्तुषाश्च ते आमभ्रष्टाश्च निस्तुषामभ्रष्टाः।
ते च ते यवाश्च निस्तुषामभ्रष्टयवाः।। अकृतफलीकरणा ईषद्दग्धाश्च यवा इत्यर्थः। तेषां यवानां करंभ
पात्रकरणमिति। करंभो दध्ना संसृताः सक्तवः। तन्निर्माणार्थानि पात्राणि करंभपात्राणि। तेषां करणं
ष्पादनं कर्तव्यं। निस्तुषा इत्यनेन फलीकरणाख्यः संस्कारः। निस्तुषकरणमात्रस्यैव विधानात्तद्

क्षिणाग्नावित्यनेन गार्हपत्याहवनीययोर्वैकल्पिकमन्यत्र तत्र प्राप्तं अपराण्हे पो घृते। अत
श्च दक्षिणाग्निहोत्रापराण्हात्यात्रासादनमन्त्रतस्योत्तरत उदकं संस्थकर्तव्यं ग्रहणानुगार्ह
पत्यस्य पश्चाद्देवाज्यघेनेन गार्हपत्यमिति तत्र श्रुतेः॥ उरु हीलानामासादनं तु दक्षिणाग्नेः प
श्चात्तानस्य अपराणस्य पश्चाद्दक्षिणत्वात्तासमजीनोपधाने त्वनयोरेव दक्षिणाग्नेः। विरोधाभावात्। प
र्यग्निकरणं तु गार्हपत्याद्देवा गार्हपत्याद्देवा गार्हपत्ये संस्कारा इति वचनात्। अथ पूर्वेक्ष न्वाहार्य
पचनेऽनुघानिवयवान्काखतानीषद्दिवोपतप्यते पां करंभपात्राणि कुर्वीति त्र्याघेभ्यात्राणि भवे
तिपात्रेषुत्पत्तानमश्पत्येघवमयानि भवेती तिवक्तत्वात् पात्रेषु त्पत्तानमश्पत इत्यर्थे वाद।
घपाऽशनार्थानि पात्राणि भाजनानि भवंति ता हशान्ते तान्यपि कर्तव्यानि। आसादनादौ च पा
त्री पृत्तानानि निधेयानि भाजनवदेनकियंतिपुनस्तानि करंभपात्राणि भवंतीत्यो काङ्क्षाया

माहा॥ यावंतो यजमानग्रहास्ता एकाधिकानि ग्रहेष्ठभवा: ग्रसा: यजमानस्य ग्रहा: यजमानग्रहा:
यावंतो यावत्संख्या यजमानस्य ग्रहा भवंति तावंति तावत्संख्यानि करंभपात्राणि एकाधिकानि ए
केनाधिकानि कर्तव्यानि। यावंतो ग्रहा: स्फ तावंत्येकेनातिरिक्तानीति यत्तत्वात् ग्रहशब्दस्य प्रजा
पशुमत्त्वमार्यादिद्वविशिष्टत्वात्तेसंख्याकरंभपात्रकरणमाविदमाहा॥ प्रजायां वा जाते श्रोतव्ये
यावंतो ग्रहा: स्फ रित्ययं ग्रहशब्द: प्रजायां वर्तमानो ग्राह्य: न भ्रात्रभार्यादौ। कुत:। तानि वै प्रतिपुरु
षं यावंतो ग्रहा: स्फ स्तावंत्येकेनातिरिक्तानि भवंति तत्प्रतिपुरुषमेवैतदेकैकेन यावंतो अस्य प्रजा
जातास्तावत्संख्यापात्राण्यमुंचतीति अवगात्। अस्यार्थ:। किं ये ति पुनस्तानीत्यपेक्षिते यावंतो ग्र
हा: ग्रहेषु भवा ग्रहास्ते प्रतिपुरुषमिति वचनात् पशव:। किं तर्हि मनुष्या: तत्रापि पापा अस्य प्रजा
जाता इति वाक्यशेषाद पत्यानि यावंति पुत्रपौत्रपुत्रीपौत्र्यादिरूपाणि ऽन्मत्या: नाम्ना न च वेषव:।

नच पुत्रः सुवासिन्यः जाल त्वा पक्षसत्वात् इति हरिस्वामिनः। नन्वेवं सत्यनपत्यस्याकरणे प्राप्ते ए
कापत्यस्य च सापत्यस्य च प्रजासंख्ययाकरणप्राप्ते आह॥ ओशिता नित्यत्वात्। वाशब्दो वधारणे ऽय
नपत्यस्य एकापत्यस्य च बहुपत्यस्य च ओशिपे वैकाधिकानि कर्त्तव्यानि। कुतः एतत्। नित्यत्वात्। क
र्मपात्राशी कुर्वतीति बहुवचनस्य नित्यमेव प्रवर्णात्। नित्यं च बहुवचनं त्रिषु। अतो बहुवचनप्रवर्णा
ओशिपेकाधिकानि अनपत्यादीनामपि भवंत्येव॥ मेषमिथुनं च। मेष ध्वमपीव मेषो। मेषयोमिथुनं
मेषमिथुनं प्रतिकृतिं च। तत्रापि मेषं च मेषीं च कुर्वतीति प्रकृतत्वात्। तत्र तदपि पूर्ववत्। त
एव निस्तुषाममृत्य वकरं भस्त्रेव मेषमिथुनं करोति। मेषं मेषाकारं प्रतिरूपकं मेषीं मेष्याकारं
प्रतिकृति चात। तत्रापि मेषं च मेषीं च कुर्वतीति प्रकृतत्वात्। तत्र तस्मिन्नेव काले प्रसक्तत्वात् नेषा मे
वमनाक्रमानोपवानामेवा। तथा वध्वा यतेयवमयो भवतः इति॥ अत्र कठसूत्रं। आमयवा

षंनाकर्मपात्राणि पाकं वो यजमानस्य पुत्रपौत्रापन्नमानः पत्नी च प्रतिषिद्धः एकमाधिकं
ष्टं गिरा मे षमष्टे गां मे चीष्ठ कोऽस्मीभिरावेष्येति ॥ मानवे च विशेषः उत्तरतो गार्हपत्यस्य प्र
तिप्रस्थाताऽऽमयविहानां दक्षाकर्मपात्राणि करोत्येको द्वात्यं गुरुपद्मात्राणि मेष हत्वा मे
षीव करोतियावंति स्त्रिंगानि शवेऽपरस्त्री लिंगानि मिष्याः प्रतिप्रस्थाता प्रस्ताव्यस्मात्क्लिष्ययतः इति ।
आपस्तंबेपि एतस्मिन्काले प्रतिप्रस्थाता रत्नीं करेभपात्रार्थान्यवा निर्वपति परिघुषाधेयुमे
पार्थीन्येष्यान्प्रतिप्रस्थाता तयोरामिक्षा च देवतमा मपिष्टाणां पत्नी करेभपात्राणि करो
तिमेषी प्रतिप्रस्थाता स्त्रियाः स्त्रीव्यंजनानि पुंसः पुंव्यंजनान्यपि वा पूर्वे कर त्वाहार्यपचनेवि
तुषानि वपवान्त्व हत्वा तेषामी पद्धुपत्नमानां पत्नी करेभपात्राणि करोत्यत्रापि मेष वमेषीच
करोतीति वाजसनेयकमेद्रागपर्यंतान विधिश्रित्ये कादशमुकपालं मेषीमविश्र पतिप्रस्था

१८

17

सुमेषकं भीपावो गाभवत्विति एतं पाकठाहीनां वारुणप्रघासिकहविर्ग्रहणकाले एवं द्वाभ
निर्वापानन्तरं करम्भपात्रादीनां निर्वपणं विहितमस्ति । माध्यंदिनानां त्वेष प्रवेशकाले इति व
चनात् सर्वं कृत्वा तत्र करम्भपात्रमपि ग्रीकरणं प्रतिप्रस्थातुर्मेषकरणमध्वर्योः एवं सेमीकरंभ
पात्राणां पवनं एकाधिकाः प्रत्येकयजमानां चतुर्मुष्टीकानां ग्रहणं । करंभपात्राणि जुहोती
ति जुहोतित्वात् श्रीनतोवहरणं पत्नी उक्षमिति मन्त्रेण अध्वर्योर्मेषार्थानां । ततो मरुद्भ्यो जुहोति
ति प्रतिप्रस्थातुर्मेषार्थानां एषकं पक्रगुप्तं कानि पात्राणि स्वाहा सोमीश्लेषणानां ते मेषमे
ष्याः समन्त्रकं सर्वं यथा स्वमध्वर्युप्रतिप्रस्थातृभ्यां कर्तव्यानि । तत्र प्रतिप्रस्थात्रा करंभपात्रमेव वी
साधारणाः पदार्थाः समन्त्रकाः कर्तव्याः । अप्यग्निहोत्रहवण्यापादवरायादाना आसादनान्ताः केऽ
नञ्च करंभपात्रमेषी साधारणाः पदार्थाः समन्त्रकाः कर्तव्याः । अप्यग्निहोत्रहवण्यादानाद्या

राम०
१०

सादनांताः कंडनश्रपणापेषणासंपवनांताश्चाकरंभपात्र्याशांयदसाधारणाग्रहणां प्रोक्षणी
अभिमर्शनाधिश्रयणाघल्लिमनांतमतः छ्मिवाकुल्लुटास्नने चात्र न भवत्येषां अहद्धार्थे
त्वपक्षे प्रणीताप्रणायने चा सर्वार्थत्वसंपवनार्थत्वपक्षयोस्तु प्रणीताप्रणायनं भवत्येव
।तत्र सर्वार्थत्वपक्षे अपां दक्षिणस्य समंत्रकं प्रणायनं। ब्रह्मन्नपः प्रणेष्यामीति वाऽहः।।
संपवनार्थत्वपक्षे च केवलस्य दध्नः। तत्र ब्रह्मन्दधि प्रणेष्यामीत्येतावदेव अत्र एवं क
रणीसमारोत्पोद्वसापनिर्मथ्यं वरुणप्रघासार्थमाहवनीयदक्षिणाग्नी विहृत्य समंत्र
कमग्न्यन्वाधानं ब्रह्मवरणं च कृत्वा यजमानवावं यच्छति वोत्कार्यं प्रतिप्रस्थाता अभ्यां यथा स्व
पात्रासादनाद्यास्पोदकनिनयनादर्वी कर्तव्यं कर्तव्या। आपोदकनिनयनं तु प्रातस्तनपात्रेषु
लिप्रक्षालनेन सह कर्तव्यं।। अनेडकीरूर्णाः प्रक्षाल्यावलेपयेत्। यो रुद्रुको नाम दक्षिणापथ

घेमे पा स्तुतिः पञ्चः । पुडकसे भा ऐ उक्सः नस्थूक्सः औनेडकः । नो अनेडुकी रूस्मी मे घरो मा शास्त्र
क्षाल्य प्रकं र्षे रागा द्रिस्ता लयित्वात पो मे बमे घ्याः पि हु मययोः शरीरे स्नाग्न्लपयेत् संप्लावयेत् ।
। तत्रापि मेषं च मे क्षी व कुवैतित पो मे वे च मे यां व प घ ने डकी रू स्मी । विदे त्ताः प्रशि जा निम्नेव
येदिति स्कन्नेः । । कुशा स्मी वा भावे । कुशा स्मी कुशानां दर्भ राशा क्रास्मीः मज शी नूला नि । मे वा स्मी
नां मे परोस्रा गा मभा वे कुशो एतो वा म क्षाल्य मे व पौराम्लव पेत् । वा विकल्पा प घु अनै डुकी र्न विदेद था च
पि कुशा स्मी स्वस्फ रिति स्कन्न त्वात् । न पा चाप स्त वः डु हासन काले नैडुकी मि रू स्मी भि र्मे व प्रति कृती लो म
शौ कु रुस्तं द भी व कुशा स्मी भि रिति । प्रषे वे प्रस्य क्षं व स्थास्य पञ्चुपे न्मेष इति वाक्य शेषात्य यस्या व हा न
म्पौ स ह स्कव्य व धा न व च ना त्त मे पं मे ष्यो पी गा र्थे त्व म म सी पति ति न पुंक्त तयोः स मंत्र क मे व नि वे प
रागादि कुर्वती ति व हु व व ना च्चा स्व र्ष प्रति प्रस्या त्र अन्नी हादि व हु क तेना पि पुक्ता । अत्रा कुः पिर म गा

राम ०

चार्यैः समन्त्रकमेव द्रव्यसंस्कारो मेषमिथुनं संस्कुर्वीत्या एकेनायं संस्कुर्वीतेति पाणिभिप्रायः । प
घस्यावदानेन सह मेषमिथुनेन मषवदीयतो अन्तस्तदपि देवतोद्देशेन त्यज्यत इति यागसा
धनमेवेति । येनु न संस्कुर्वीतेति तेषाम् अपि प्रायः । नैव यागद्रव्यं मेषमिथुने । वारः शोभमेवो
भवति । मारुतीमेषी हि श्रूयते न त्वातेन वारुणीं मारुत्या हि एष मेषमिथुने त्यज्यते । यदि च वारुणीं मा
रुते च हविस्तदर्थं नैष सदेवतो हि शद्भिति मिश्रेण त्वहृष्टोद्देति षु संस्कारस्तस्मादधर्मकमिति । तु
ष्टोति वैमेरा मेषमिथुनं संस्कुर्वन्दारुणीयमिति श्रीअनन्तयाज्ञिकाः । हरिस्वाम्यभिमतस्त्वायं पक्षः ।
पतः सत्स्वा द्रव्यावदानेन सह मेषमवदधातीति । होमसंबन्धोऽवदानसंबन्धात्मेषस्य । होतन्त्वत्वा
वदानस्यानन्तरमेषोऽपि वारुणायैव होतव्यः । यागसंबन्धाभावाच्च नया गृह्यवृद्धैर्मौः कार्यः इति कर्की १
चार्यसंप्रदायकाः शदिमन्त्र यागसंबन्धमेव तेषां मन्त्रसमन्त्रकाः स्तार्यायोगे मा भवति ॥ आहवनीय १

स पुरस्ताद्वेदीं करोति। करंभपात्रमेषमिथुनकरणात् अनंतरमाहवनीयस्याग्नेः पुरस्तात् द्वे स्फ्यादिशि द्व
वेदी करोति। स्फ्याद्दक्षिणातः अपरा उत्तरत इति। तद्द्वे द्वे वेदी हा च पत्नी भवत इति श्रुतत्वात्। तत्र प्रधानत्वाद्धु
ङ्नां हविषां सादनार्थत्वाच्चोत्तरवेदिः पुरस्तादाहवनीयस्याजेविनात थाच मानवी। श्रेनसाहवनी
येत्रिपुप्रक्रमे षपरिमिते वा वकोशष्य शेशेकं निह रखवेदादानप्रभृति वेदिं विदधाति। षड्
शप्यां प्राचीं चतुर्विंशत्या पश्चात्त्रिंशत्या पुरस्तात् एवं द्वे वेदी वितीयमात्रे अरत्निमात्री चतुर्दिक्षु
तरवेदिं विदधात्यरोऽरत्निः प्रक्रममात्रे वेदेरुद्धत्वात्वाल्वालेशम्या यां परिमिमीत इति। प्रा
देशोन्तरा। तयोर्द्वयोर्वै घोः प्रादेशः प्रादेशपरिमितो देशो नराश्वन्तरालं भवति। अंगुष्ठतर्जन्योः प्र
सारितयोः प्रादेश उच्यते॥ एषयोर्वा। अथवा द्वयोर्वै घोः एथोतरा अन्तरालं भवति। प्रारखोतशदे वा
अहापस्तंबः। द्व्यंगुलमंगुलं चतुरंगुलं पृथमात्रं पृथमात्रं सीतामात्रं प्रादेशमात्रेणावाति यंग

संभिन्नैकी भवत इति प्रसृतांगुलि रामशिरांबंधनाद्धस्तः पृथक्शब्देनोच्यते मानं वैव प्रतिप्रसृष्ठातादक्षि
णां वेदिकरोत्याजर स्मात्परिग्रहाद्रत्निमात्रं मंतरा समेप्राची भवतीय याहवीमिस्तं मवेयुस्तथा ति पृथ्वी
एकद्वकरो परेणोत्तरांसं वयजुहेरतीति ॥ रथमात्रेण डलं रावेदिः रथमात्रीरथप्रमाणा भवति । दक्षि
णानु प्रकृतिवद् वापरिमितमानं वा । व्याममात्री पश्चादित्यादि प्रमाणावा रथप्रमाणं च स्वच्छंदपु
ल्विकृतोक्तो अंगुलैरष्टसप्ततिमानायाः प्रमाणं तत्राष्टाशीतिशतमीषा चतुःशतमक्षः षडशीतिर्युगं वा त्वा
रोहकाः प्राप्नेति अरत्नेश्चतुर्विंशो भागोंगुलोऽपुरुषस्य पंचमो भागारत्निः । अथवा कूर्वस्य द्वारभ्यक
निष्ठिकाग्रांतः । तत्र चतुरंगुलाधिकं शतांगुलं पक्वातिर्यक्प्रमाणं अष्टाशीत्यंगुले षडधिकं शतांगुला
प्राची षडशीत्यंगुलं पुरस्तात्तिर्यक्प्रमाणमिति । तत्रापं साधनोपायः । अष्टाशीतिमात्रांगुलां रज्जु
मित्वा तत्र लक्षणां कृत्वा तत चतुर्भिरंगुलैरज्जुमूलरज्ज्वार्धं प्रमाणमन्यस्यतस्यायमस्तोयां

२०

रत्नेः आधिबध्भागे अंगुलत्रिभागद्वयाधिकपंचदशांगुलप्रमाणे लक्षणं कुर्यादिति एतदेकमुत्तरवेदेः
प्रमाणमुक्तं। अथ द्वितीयं प्रमाणमाह। चतुस्+ आकर्षणार्थं कर्त्तव्यं। ततो ऽभ्यासरज्जोरंतात् अयमस्त्वारिं
शत्तमे ऽगुले अंसांकनार्थं द्वापंचाशत्तमे ऽगुले च श्रोण्यंकनार्थं लक्षणं+ २ रत्निवीपश्चाद्दशम प्राचीबद्ध्वा
त्रायःपुरस्तात्प्यावा शब्दो विकल्पार्थः॥ अथ वोत्तरवेदिः पश्चाच्चतुररत्निस्तिरश्ची भवति समारत्निः
षडरत्निर्वा प्राची प्रागायता अयं पोरत्न पक्षः पुरस्तात्तिरश्ची भवति। शारवांतरादेवा तत्र षडरत्निः
प्राचीति पक्षे अयं समाधनश्लोकः। नवारत्निमिता रज्जुर्लक्षिता षट्स्वतः परं। अर्द्धद्वैत्रिषु पाश्वः
स्यात्पश्चु वेदेः प्रसाधनमिति। अस्यार्थः॥ न च मितरत्निभिर्मिता रज्जुः षट्करनिषु लक्षिताविद्धा
पक्षाकार्या। तत्र लक्षणं प्राच्याश्चंकनार्थं। अतः परमस्मात्षडरत्निमिते स्थाने लक्ष्म लक्ष्मशयनात्परं
त्रिषु स्थानेषु अर्द्धे अर्द्धारत्नावर्द्धरत्नौ लक्षणं कृत्वा पश्चु वेदेः प्रसाधनं कार्यमिति। तत्र प्रथमे ऽर्द्धार

20

शम०
२०

त्नो आकर्षणार्थं॥ द्वितीयद्वारत्नौ प्रोक्षपकनार्थात् तीयद्वारत्नावं सांकनार्थमिति पाशविषयासिनार्थ
साधनोपायः॥ द्वारत्नौ लक्षणां कुर्यात् द्वे साईत्रयेन या॥ अर्द्ध ऽरत्नौ ततः सार्द्धपञ्चवेदैः प्रसाधनी॥ अ
स्यार्थः। द्वौ अरत्नी प्रमाणमस्याः साम्नर॥ त्रिअङ्गुलः तस्या द्वारत्नौ रज्जो लक्षणां कुर्यात्॥ प्रोक्षक
नार्थं ततो ऽर्द्ध अर्द्धारत्नौ आकर्षणार्थं लक्षणां कुर्यात्॥ ततः सार्द्धत्रये अर्द्धारत्न्याधिके अरत्नित्रये
प्राक्तं सांकनार्थं लक्षणां कुर्यात्॥ ततः परमर्द्ध अर्द्धारत्नौ आकर्षणार्थं ततः परमरत्नौ अरत्निप्रमा
णां सांकनार्थं लक्षणां ततः परं सार्द्धअर्द्धारत्निसहिते अरत्नौ सार्द्धारत्नावित्यर्थः। तत्र लक्षणा रज्जोः
तपाश इत्यर्थः॥ अयं च पाशाविषयो सेन साधनोपायः समारत्नि प्राचीपस्त्रेतु समारत्नि परिमितां र
ज्जुं तत्र लक्षितां तदर्द्धनाभिवर्द्धवर्द्धितायाः अपेक्षा भागे लक्षणामाकर्षणार्थं कृत्वा प्रान्ताद् रत्नि
द्वयसार्द्धारत्नौ च प्रमाणसांकनार्थं लक्षणां कुर्यादिति॥ तेषां मध्ये शङ्कुः तत्र यः पुरस्तादिति प्रागुक्तो तेषा

२१

21

त्रयाणामग्नीनां मध्ये शंकुर्निर्दिष्टस्तत्र त्रिशंकुना कार्यमस्तीति पूर्वं त्रिशंकुसहितमित्यत्र

॥ अपरिमिता वा ॥ अथवा ऽन्ते रेवेदिः परिमिता ऽत्र प्रमाणाद्भूयादतिशयेनाधिक प्रमा

णा अपरिमितं प्रमाणाद्भूयइति प्रत्यक्षतोक्तत्वात् । अतएव काहिकचातुर्मास्यादौ हविरासा

दनपर्यन्ता अपरिमितावेदिराश्वयणीया ॥ अन्यथाऽवरोक्तमुत्तरेण हविषीति न्यायेन

हविषामासादनासंभवात् । अत्रापि यावती दीक्षितपत्नी तत्प्रमाणा रज्जुर्भवति तत्र लक्षणा

क्तत्वादीर्घप्रमाणा ऽप्रमेयस्यत स्यादित्येषोऽभागे लक्षणा माकर्षणार्थे सत्वापश्चात् तिर्य

क्प्रमाणाद्वैशोणं कनार्थप्राप्तिर्यक्प्रमाणाद्वास्यां कनार्थे च लक्षणां कुर्यादिति स्फ्यासमर्थ

ना कुशेति ॥ अत्र दृष्यो वेधः स्फ्यादि स्फ्यादानादारभ्यासमर्थनान्तं दत्वा पत्नी सर्वा समन्ततो

त्य वसनं तत्करोतीत्यर्थः ॥ अत्र प्रकृतिश्च दृढ़ीकृतिः कर्तव्येति न्याया प्रकृतिवत् सर्वकर्तव्या प्रकृतौ चासादि

रा.प्र.

२१

नः प्रोक्षितध्रुवस्रुक्‌स्रुवस्फ्यराद्दो पात्राः प्रोक्षणं च प्रोक्षणीभिः कृतं तेन ध्वाग्निहोत्रहवण्यां पवित्रा
भ्यां चसेस्फियतां पवित्राभ्यां चरुस्थाली कुशोच्छिष्ट पंतद्भ्यां थीदेतान्यत्र एवं मासे मासे आद्दनीयानि प्रो
क्षितव्यानि च। तत्र वृ प्रकृतौ ब्रह्मवरणं कृतप्रणय वेक्षणं कृतं। पात्रासादनप्रोक्षणकाले च प्रोक्षितेन
यजमानेन वाज्यमन्वेक्षितं। वाज्यते नाथ पुरुषाः प्रोक्षणं चाश्रातप्तावक्षणं वैमन्त्राप कल्प्यते। स
र्वथैव प्रोक्षणप्रणीताप्रणयनं। तत्रायं क्रमः॥ तत्र यदि प्रागन्वाधानात्कर्मपात्रकरणं
कृते कदाचिदन्वाधानोत्तमयोः शाखाच्छेदः। अन्वामन शाखापरिवासनं वा। अधवयोरिवेपवे
षकरणा। पवित्रच्छेदनमुभयोः। विरूपाकरणं उभयोः। वरुणाय भागनिष्पदैः॥ महेन्द्रा
भागनिर्निमित्तं प्रस्थात्तुः उद्दहनमुभयोः। ततो ब्रह्मवरणं। यजमानवाचंयच्छेति प्रैषः। वा
ग्यमनं। पात्रासादनं। तत्र पवित्रच्छेदनानि पवित्रे अग्निहोत्रहवणी। अतद्दोनं शूर्पं शम्या

चेति पञ्चात्सादनमध्वर्योः श्रम्यावर्जितं पंचकासादनं प्रतिप्रस्थातुः अग्नेवरास्यपश्चाद्दुत्तरतो वा । ततउभयोर्वाग्यमः । ततः पवित्रच्छेदनादि भिः प्रोक्षणीः संस्कृत्य वृत्यन्तैर्न तत्रायोः प्रोक्षणामुभयोः अध्वर्योः शम्याप्रोक्षणामधिकं प्रोक्षणीनां स्थापनमुभयोः तत्रागृहीत्वाय द्योर्नो वेदिमानमुभयोः ततः स्फ्यादानादि संमर्शनान्तमुभयोरिति केचित् अध्वर्योस्त्वालभा नाध्वर्योः शम्याया आसादनं प्रोक्षणं चेति अप्राकृतकार्यार्थत्वात् मिपमेव्वायेथा क्षिप्तमन्त्रकाने वेशामचाग्नेत्वाधानेब्रह्मवरणावसृष्टेकृतमेवास्फ्यादिपात्रासादनं च प्रोक्षणापः संस्कृता एवं सन्ति केवलमत्र तुरागशम्याया आसादनं प्रोक्षणामात्रं कार्यं ततो वेदिमानादि यजमानस्य वाग्यमः सप्रोत्राणि भवन्त्येवा पूर्वे वत्स न्याव सतीत्येत स्यमत्तस्यानुष्ठाने तु शाशम्याया रपिमघमे पीमे पीनिर्वपशास्तवेधिपात्रेः सदासादनप्रोक्षणो भवतानपृथक् । उभयोरेक

राम० २२

उत्कारः ॥ पुनमेर्येवैं घोरक एवोत्करोमवत्कतस्याद्वेदेः समीपे ॥ अपरेणावदिं प्रतिप्रस्थातुः
संवरः स्तवयजु हरणार्थमुत्करं प्रतिगच्छतः प्रतिप्रस्थातुरुपरेणात्तेणवेदिं संचरो मार्गो
भवति संचरति गच्छत्यनेनेति संचरः ॥ गावरसंचूरेति कशेणा घंप्रत्ययान्तो निपातितः तथा चा
पस्तंवः अंतरा वेदीं प्रस्थातुः संवरा परेणाग्नेरवेदिं स्तवयजु हरन्नाभ्युपजं भि परिहरन्न
त्करे निवपति समानउत्करः पंचबर्हिज इति ॥ मानवेचा अपरेणान्तरं स्तवयजु हरतीति ।
अतस्तवयजु हरणाये वा यं संचर नियमो नान्यनेति ॥ अन्यत्रत्वं तरा वेदी ॥ अत्रापस्तंवः अग्रे
णा गार्हपत्य समे प्राचीं वेदीमवत उत्तराम ध्वर्युः करोति दक्षिणां प्रतिप्रस्थाता तं तेरावि हारो ध्वर्यु स्य
रति दक्षिणो प्रतिप्रस्थातो भयत्र हस्तेनांतरेण पिपत्नी संयाजाए कवंशप्रेषा द्विवद्ध स्यानुजानां
तीति ॥ तद्यायदे वा ध्वर्युः करोति तत्प्रतिप्रस्थाता यत्किंचवाव कर्मणामध्वर्यु रेव तत्करोति पात्नागप

२२

23

पक्काला न्वानिगदांसाधारणाद्व्यंग्य संस्काराणीति॥ उत्तरवेदिं निवपत्यकृते रस्यां उभयसंवे
द्येऽतु उत्तरवेदिं निवपति। वक्ष्यमाणेन प्रकारेण। स तु उत्तरस्यामेव वेदावुत्तरवेदिमुपकिरति न द
क्षिणस्यामिति प्रकृतत्वात्। उत्तरवेदिरिति वक्ष्यमाणसंस्कारसंस्कृतस्य वालुकादाहृत
स्य स्थण्डिलस्य नामधेयम्॥ शम्यामादाय चात्वालं मिमीते पूर्वेणोत्करं संवरं परिहाप्य
शम्यामादाय द्वात्रिंशदङ्गुलप्रमाणां शम्यां वा संगृह्य तेन गृहीत्वा उत्करं पूर्वेणोत्करात्
वस्यादिशि संवरं परिहाप्य संचरणार्थं मार्गमन्तराले मुक्त्वा चात्वालं मिमीते चात्वाल इति
मानादिसंस्कारसंस्कृतस्य गर्तस्य नामधेयं। तच्च संस्थाया वरणार्थं चात्वालं मार्जयेत इत्यादेश
अथ शम्या च संस्कारवादत्त इति प्रकृतस्य पत्रैव स्वयमेव न सामान्येनाग्रेणोत्करं चात्वालं परिलिख
दिति प्रकृतत्वात्। अत्र पूर्वेण शम्याया आदानं तत्स्याधानेन ततः चात्वालमानमिति मिमी

राम०

२३

नरत्यक्तंतथैवमात्रप्रकारमाह॥ शम्यामुदीचीनिदधातिउकरात्पूर्वतःसंचरणायमार्गंपरि
त्यज्योत्तरस्मादेघंतादुदीचीमुदगग्रांशम्यांनिदधाति।पश्चिमवस्त्वयंमनेसाम्नेत्याग्नेरोगात्करेत
घ्वान्वालपरिलिख स्त्र वेघंतादुदीची॰ शम्यांनिदधातीतिप्रक्रान्तत्वात्तथाथावापस्त्ववेउत्तरस्मा
देघंतादुदक्प्रक्रमेचात्वालइतिप्रश्नस्यपरिलिखनात् संजीजानुदघ्नंनिवितस्तंवारवात्वात
रवेघर्षान्यासन्नदरतीति।काठकेवाउत्तरतश्चात्वालंवहिर्वेदिसंप्रत्यक्तरवेदिस्त्रिप्रक्रमे
परिमितेवेतिजानुदघ्नंखातेतिच॥पुरस्ताच्च॥शम्यामात्रमेवांतरालंत्यक्त्वावेघंतादेव
पुरस्तात्पूर्वस्यांदिशिउदीचीमुदगग्रांशम्यांनिदधाति।अथपुरस्तादुदीची॰ शम्यांनिदधा
तीतिप्रक्रान्तत्वात् दक्षिणातःप्राची॥उत्तरवेघंतमनुलक्षीकृत्यदक्षिणातोदक्षिणस्यांदिशिप्रा
गग्रांशम्यांनिदधाति।अथानुवेघंतप्राची॰ शम्यांनिदधातीतिप्रक्रान्तेः।एवंचतुर्दिक्षुशम्या

२४

24

यामि कनिन चात्वालस्यमानमुके ॥ स्फ्येनोल्लिखति तमायनीति प्रति मंत्रं प्रतिदिशं शम्या
तिश्चयत्न मायनीमिसीत्यादिभिश्चतुर्भिः प्रतिमंत्रं स्फ्येन करणीभूतेनोल्लिखति निहिता
याः शम्या या मध्य पार्श्वे अभ्यंतरं स्फ्येनरेखां करोतीत्यर्थः ॥ तसमापनीति पश्चात् ॥ विनायनी
तिपुरस्तात् ॥ अवतान्मानाधिताया शम्यायाः दिति दक्षिणतः अवतान्मा व्यथिता दित्युत्तर
त इति सर्वे पृथङ्गाहुर्दीचीः शम्यानिदधातिमयपरिलिखतितमायनीमिसीत्येवं सर्वत्रनिश्चनको
नेत्येव सपरिलिखतीति प्रत्येकं मक्तत्वात् ॥ एवं द्वात्रिंशदंगुलः समचतुरस्रोऽग्न्यालयः प
रिलिखितो भवति ॥ विदेदग्निरिति चात्वाले प्रहरति स्फ्येनान्वारभ्य ॥ अन्वारब्धे यजमाने ६
धर्पुर्विदेदग्निर्नभ इति मंत्रेण चात्वाले अधिकरणभूते स्फ्येन करणभूतेन प्रहरति ॥ प्रहा
रं करोति पुरीषोत्खननार्थं ॥ स प्रहरति विदेदग्निरिति चात्वाले अन्वारंभः प्रहरणमात्र एव

रामं०

२४

भवतीति तत्रैव विधानात्। अग्ने अंगिर इति पुरीषं हस्तेन च।। ततो द्वयुः स्यात पुरीषं अग्ने
अंगिर आयुनेति मंत्रेण हस्तेन वकारा स्फ्येन च स्यात वेदिमध्ये निहितशंकुसमीपे निवापाय
नयति। अपदइरतीति प्रकृतत्वात्। योऽस्यामिति निवपति पश्चार्द्धे शंकुसहिते।। योऽस्यां पृथि
व्यामसीति मंत्रेण तदुद्धृतं पुरीषं तत्तरस्यां वेदेः पश्चार्द्धे पूर्वभागे शंकुसहितं प्राग्निहितश
ङ्कुसंलग्नं निवपति। राशिं करोति। प्राक्षु स्वकृत्तरस्य वेद्यां निवपतीति मानवे। योऽस्यां पृथिव्याम
सीति हि त्वाग्निदधातीति प्रकृतत्वात्।। अग्नीदुत्कर वदत्सीति इति। तदुद्धृतपुरीषं अग्नीदुत्करवद
त इति मंत्रवर्जं पाणिद्वयेनाभिन्यस्यति। अभिनिदधाति। हस्ताभ्यामेव वा धत्त इत्यर्थः। अथ
हरति पत्रं हरति तदग्नीदुपसीदतीति प्रकृतत्वात्।। एवं द्विरपरं।। यथाविदे दग्नास्ति प्रहरणा
दारभ्याभिन्यासान्तमेकवारं कृतं। एवमेवोपरं द्वि द्विःवारं कर्तव्यम्। तत्र विशेषमाह।। द्वितीयस्यां

तृतीयस्यामितिविशेषः। योद्वितीयस्यामिति द्वितीयेपुरीषानिचयनमंत्रेविशेषः। यस्तृतीयस्या
मितितृतीयइतिअनुव्येतिचतुर्थ्यचार्थमाह त्वयि ७ त्वसीति व्यहत्युत्तरवेदि ६ शम्यामात्रीमंत्रे
नुत्वादेववीतयइत्यनेन मंत्रेणा चतुर्थ्यं यथार्थे यावतापुरीषेणार्थः उत्तरवेदिनिष्पत्तिरूपप्रयो
जनेतावत्पुरीषमाहृत्य शंकुसंगीपश्चानीयधुरि ८ त्वसीति मंत्रेणाकल्पस्वेतिपदवतायुक्ते
न उत्तरवेदिं व्यहतिपुरीषमभिसंलग्न मेवदस्तेनसर्वपरिप्लवोत्तरवेदिं शम्यामात्रीद्वात्रिंश
दंगुलपरिमाणाशम्याप्रमाणमानिव्यादयतीत्यर्थः। व्यहृतीयस्यान्यत्रापिहस्तेप्रेरणा
र्थस्यैवदृष्टार्थत्वात्स्वकाहतीत्यादौ कानुत्वादेववीतयइति चतुर्थ्य ६ हरतितोवैचतुस्र
केष्वानालाद्धरति व्यथानुव्यहतिसि ७ त्वसिसपत्नसाहीदेवेभ्यः कल्पस्वेतिष्कातत्वोता।

दिशं दिशमनुविभागे नोङ्कृतिजैरयत्निश्चतुरस्रामुत्तरवेदिं करोतीति हरिस्वामिनः। तां वै युगशम्येन
मिमीत इति। क्कतत्वात् शम्यामात्रीत्येके। तथा च द्वात्रिंशदङ्गुलासमचतुरस्रा तर्वेदिर्भवति। अरत्ने-
श्चतुर्विंशो भागोऽङ्गुलं चतुर्विंशाङ्गुलोऽरत्निरित्युक्तत्वात्। अरत्निस्तु कूर्परादारभ्य कनिष्ठि-
काग्रपर्यन्तः। अरत्निस्तु निष्कनिष्ठेन मुष्टिनेत्यपवादः। अथवाऽऽऊर्ध्ववाहोः समस्थितस्य पुरुष-
स्य पञ्चमो भागोऽरत्निः। पञ्चारत्निः पुरुष इति सूत्रकारस्योक्तेः तस्य चतुर्विंशो भागोऽङ्गुलमिति। अथोत्त-
रवेदेः प्रमाणान्तरमाह॥ ॥वितृतीयामरत्निमितां युगमात्रीं यजमानदशमाय यां वा॥ वाशब्दो विकल्पा-
र्थः। सर्वप्रत्येकमभिसंबध्यते। वितृतीयां वा उत्तरवेदिं कुर्यात्। तु वितृतीयामिति वेदेस्तृतीयभागः
समिता इत्यर्थः। तच्च यत्प्रमाणा यां वेदावुत्तरवेदिं कुर्यात् तेन तद्वेदिक्षेत्रस्य सर्वक्षेत्रफलेन चतुरस्री-
कृत्य त्रिभागपरिच्छेदेकं तृतीयभागं पृथक् चतुरस्रीकृत्य तत्प्रमाणामुत्तरवेदिं कुर्यात्। तदुपाय-

श्रमुञ्च हतेतितोक्तः पदं। तिर्यङ्ङानीति पदापार्श्वमानीतस्या छायायास्तु दशकरणोति। एवं च क्षेत्रफलेन
दशधामिति दशनपचे च दपापदे स्तु व्यतोपधापदयोपर्यायवल्लह हत्वा तावद्वा दशांगुलं पदमिस्यात्क्ति
त्वाच्च। किं च तु दशपधामिति पुरुषप्रमाणाशितपदक्षेत्रफलामाह॥ कुमः॥ तां चै पुगमात्रीवास
र्वतः करोतीत्यत्यः सर्वमद्दृत्यनुवर्तमाने यजमानस्य वाहदशादशपदानीतिसूत्रेः। अतश्च स
र्वतः सर्वासु दिक्षु दशदशपदानीत्यर्थो भवति परिशिष्टकारवचनस्यनुशारवांतरं च वचनं
मूलं भविष्यति। हरिस्वामिनस्त्वाइमो ष्यातिं पदं तिर्यङ्ङानीत्यादिपरिशिष्टकारवचनानुरो
धेनैव व्याख्यातं वेतः। तथा हि। ज्युप्रमाणां चतुर्थिपार्श्वेषु करोति। अथवा यजमानस्य
तु शादशापदानि सर्वतः करोति कथं पदं तिर्यङ्ङानीत्रेपदापार्श्वमानीयस्य क्षेत्रं पर्यस्य पद
लैयातपायन्मीयनेरज्वानहृषा पदं भवति। तानि च प्राच्यां पिब्रमानानि दशभवति। दक्षिणा

तोपि प्रत्यगुदक्षेत्येवं यजमानस्य दशपदानि सेपा घामि । एकशत । विधेष्येवमेवाग्निवेदिमा
नेकरिष्यति । सापावत्स्येघास्तत विधस्य वेदिस्ता वतीवतुर्दश क्रमः एकशततृ । विधस्य वेदिं मिमी
तइति । अपाग्नेर्विधाप्वाविः शतिः प्राचः पुरु घाच्चाषिः प्रातिस्तिर्यंच इति चोत्तरवेदिः साधमि
कासोमेसमाम्नाता ॥ उत्तरवेदिशब्दः स्वसंस्कारवाची अतौत्र नामधेयेनैतेस्र वैउत्तरवेदिसं
स्काराइतप्रार्थ्यंते । तत्र यावंत्युत्तरवेदिप्रमाणानि सोमेष्क्रतानि तान्यपि सवीरापत्र प्राप्नुवंति ।
नेचतानिसावीरायपीहद्युतिनेष्याहा ॥ सोमेवोत्तरे व्यपस्फुरणाष्क्रुतेः ॥ कथा ह्येव धारणा ॥ उत्तरे
यंतिमिहृ उत्तरेवेदिप्रमाणाद्विगमाम्नीयजमानदेशपघांवेत्येतैसोमेएव भवतो नान्यत्र क्तुं
तः व्यपस्फुरणाष्क्रुतेः । यत चातुर्मास्येषु वे [illegible] प्रकृतरचेघोर्व्यपस्फुरणा श्रूयते । तथाहि मदिग्युज
मात्रीदशपदीचोत्तरवेदिरितीतरा वेदिष्वोत्तरवेदिष्व व्यपस्फुरियातामितिव्यपस्फुरणां चस्य

२८

27

र्ग्रंथते। अत उत्तरपो प्रमाणायोऽहि प्रतिषिद्धत्वात्परिसिद्धा निश्रीणि प्रमाणानीह भवेति।

असंभवाच्च॥ न केवलं व्यपस्फुरणो प्रवरणात्। अपितु असंभवाच्च। अत्रासंभवादयुत्तरप्रमा

णे असिमेव वमवतानान्यं अतो वरुणप्रघासा हेउत्तरप्रमाणेन संभवतः। कथं। तथा हि उत्त

रस्यां वेदावुत्तरवेदिं निवपति। अतोत्तरवेद्याधारत्वेन वेदिः प्रक्रान्तान्व महाप्रमाणाया अल्पप्रमा

णा वेदिराधारत्वेन संभवति। अन्तोपि कारणात् अत एवोत्तरे प्रमाणे संभवतः। अत एवासंभवा

दिति हेतूपादानात् अन्तपघानन्तु दर्शपदक्षेत्रफलात् तस्याधिकत्वात् प्रघासिक्याम् अपि

वेदौ संभवो भवत्येव। तथा चात्र संभवादिति हेतुरसंगतः स्यादिति। तस्माद्युक्तपदक्षेत्रफल

दर्शपदेष्विति सूत्रकाराभिप्रायः॥ मध्ये नाभिं कृत्वा प्रादेशसमां चतुःस्रक्तिं। उत्तरवेदिमध्ये प्रा

देशसमां प्रादेशप्रमाणां चतुःस्रक्तिं चतुःकोणां नाभिं करोति। मध्ये नाभिका निवकरोति

राम

२८

समानत्रासीनोव्याघारयारातीतिक्रान्तत्वात्॥ अथास्यामध्येप्रादेशमात्रींगोपदमात्रीं अश्वशफमात्रींवोत्तरनाभिंचतुःस्रक्तिंकृत्वेत्यापस्तंबः। काठकेपरिमंडलांवेति॥ ॥प्रोक्षत्युत्तरवेदिं॥ सिकताभ्यः प्रकिरतिसिंहसीतिप्रतिमंत्रेणि॥ सिंहसीतिद्वाभ्यांमंत्राभ्यांप्रकृतिमेनमुत्तरवेदिंप्रोक्षति। सिकताश्चप्रकिरतितत्रब्रह्मवनिंत्वेतिमंत्रेणाद्भिःप्रोक्षति॥ शुंभस्वेतिमंत्रेणोत्तरवेदौसिकताःप्रकिरतितदुपरिदिक्षुपतिलामहद्भिरभ्युक्षति। साभ्युक्षतिसिंह॥ सिंहसिसपत्नसाहीदेवेभ्यःशुंधस्वेत्यथसिकताभिरनुविकिरतीतिप्रकृतस्यसोनुविकिरतिसिंह॥ सिंहसिसपत्नसाहीदेवेभ्यःशुंभस्वेतिक्रान्तत्वात्॥ ॥२ छन्नावसति॥ साउत्तरवेदिर्दर्भैस्तराकरादिनायज्ञियेनछन्नासतिरात्रौवसति। अर्थेनांछादयतिसाछन्नैता॥ रात्रिपस्ततीतिक्रान्तत्वात्। विलतीनांसघःकालत्वेपीहवनाद्युहुकालतामवतितथावकाठकोप्यत्राधिप्रसमयेतद्दति एवमन्येपिपत्रेषु। आपस्तंबस्त्रेणुविशेषः

मघस्कालात्रावहुशाप्रघासाद्यतिविकल्पेनसघस्त्वस्यायुक्तत्वात्। उडुंवरशाखाभिः सप्तशाखा
भिर्वीप्रच्छाद्यवसतिसघः कालः पञ्चमुर्भवतीत्यापस्तम्बः॥ प्रातःपंचगृहीतंगृहीत्वाग्नीप्रणाय
तीध्माभ्यामुपयम्य। द्वादशनांतत्र पूर्वदिने कृत्वा कालःप्रयोगत्वेनान्यसंस्कारपूर्वकंतु द्वा
पंचगृहीतमाज्यंगृहीत्वाइध्माभ्यां द्वाक्ष्णीप्रणायति। किं कृत्वा उपयम्य उपयमनीभि हपञ्च
त्यसतापपरिहारार्थकं विस्तार्य स्त्वाभिरन्नैरधस्ताद्धारयांकृत्वाइध्मम्भ्यादधत्सपयमनी
रूपकल्पयंत्याज्यमधिश्रयंतीत्यादिप्रकृतत्वात् अग्निप्रणायनेचसर्वधर्मकेशोमेउपदिष्टं।
तत्रस्वेकोग्निप्रणीयते। इहतुतद्वैद्वेवेदोद्धावग्नीभवतइतिद्वयोरप्यस्याविधानात् द्वयोःप्रणा
येनीतिप्रणायनविधानाच्च इध्माभ्यामग्नीप्रणायतीत्युक्तं। अपरिमितंप्रणायनीयेत्रिप्रनाभि
रुक्तत्वादेकैकेषां परिमितकाष्ठकास्त्रिपञ्चवद्धूम्रभवति। तावित्वेविधावि ध्मौमध्याह

वनीयस्याधस्तादर्धं प्रतिप्रस्थातारौ ऽप्यपस्पृते ऽपसंगत्स्वते ग्निसिद्धिः स्पप यमनंत्वेऽसिकताः।
अध्वरणार्थे यात्र संतापपरिहाराय योपसमीपे कल्प्यंते स्थापयेती तिहरिस्वामिनः। आप
स्तंबः। ऽऽ ह्नं वरणास्वामिनी प्रच्छा घवसति। यघस्मघः कालः पक्षमेव वाऽऽहवनीये प्रणापनीयं
इ श्रामार्दीप्यसिकताभिरूपयम्याग्नये प्रणीयमानायानुब्रूहीति सं प्रेष्य प्रणीयमानायानुब्रूही
ति वेति। मानवेचाचीन्वालातुपयमनीकुरुते वेदिपुरीषात्। प्रतिप्रस्थातागनये प्रणीयमाना
यानुब्रूहीत्यनुवाचयति अग्निभ्यां वेति। अतङ्गघमन्यः सिकतावाचान्वाकालम्यत्तिकावाग्ना
त्घाऽसपीनामपिसम्भृतत्वात्।। सर्वे वा विभज्यप्रा कृतत्वात्।। अथवा सर्वमेवाहवनीयं द्वेधा वि
भज्यकर्पराभ्यां प्रणायेत्। कुतः। तस्य प्राकृतत्वात्। प्रकृतिते प्रामत्वात्। प्रकृतौ हि दर्शपौर्णमास
योरेवमेव प्रणयनं दृष्टं सोमेवध्धमेव दिक्षिनप्रणायनमाम्नातं न चवकृराप्रघासानां सोमः प्रकृ

तिः। किंतु दर्शपूर्णमासाविव। अतः प्रकृतिवदेव कर्पणास्यां सर्वमाहवनीये विभज्य प्रणयनं क
र्तव्यमिति प्राप्ते आह। अथ वा सर्वमाहवनीये विभज्य हे अप्रकृतत्वाद् द्वयोर्वैद्योः प्रणायनं कर्तव्यम्। कुतः।
अप्राकृतत्वात्। अस्य प्रणयनस्यापूर्वत्वादित्यर्थः। इत्यकारलोपेण वाक्ये योऽशंकमानादित्वाच्च प
रकृपूर्णसूत्रे निर्दिष्टः। यथा विकवाप्रकृत्यनुग्रहादित्यत्र कर्काचार्यो नास्य प्रश्लेषेण व्याख्याने
। सर्ववेदसं प्रकृत्य सहस्रेणानुग्रहदर्शनादिति। तथा वात्रापि प्रश्लेषो युक्त इति। पक्षान्तरमाह।।
णायनं सोमाद् द्व्यक्तत्वात्। अथ वा अन्यत्र सोमात्प्रणायनं स्यात्। सौमिकधर्मेणाग्नेः प्रणाय
ने भवेयान प्राकृते। कुतः एतत्। वाच्यत्वात्। एवं सत्युत द्वाव्यं वक्तव्यं विधेयं भवति। यदि सौमिको न स्या
प्राप्तत्वात्। प्राकृतं तु चोदकेनैव प्राप्तत्वेन विधेयं विधीयते च द्वयोः प्रणयतीति। तस्माद्यन्न प्राप्तो
ति तदेवैतत्प्रणायनमिति। सौमिकमेव स्यादिति प्राप्ते आह।। ।।प्रकृतेर्वाऽनामतत्वात्।।वा।

द्धः पक्षव्यावृत्तौ प्रकृतेरेव देवप्रणायनं भवति यदि वा गार्हपत्याद्दक्षिणाग्निमिति पक्षः। न सोमात्तत्र च सौमि
के मिथ्यासौमाहवनीयात्। इति कुतः अनारभ्य वात्। ... नाप्रक्षेयं हि धर्मोऽग्निं प्रणयति। न वैतन्माम
धेयं। तिडंतत्वात् प्रणयंतीति। ननु प्राकृतं चेदेतत्प्रणयनं तद्धि तत्स्य चोदकादेव प्राप्तत्वात् कि
मिति पुनर्विधानं द्वयोः प्रणयतीत्यत्र माशंक्याह॥ अग्रहणं गुणार्थमुत्तर एव च जिनमिथामात्
प्राकृतप्राप्तस्यात प्रणयनस्य पुनर्ग्रहणं पुनर्विधानमितत् गुणार्थं कोगुणः इति वेद सिविहितगुणाः
। उत्तर एव धृष्णिनिधाना प्रकृतौ आहवनीयस्य वेद्यग्निर्निधीयते ... तत्र वेदौ ति नोत्तर वेदिनि
धानार्थं प्रेयने पुनः स्यप्रकल्पीतः। इतरत्र न पुनः सप्रकृतेः गुणात्। द्वयोः प्रणयतीति वचनं द्वयोर्मध्य
मपर्वणोः प्रणयनं निप्रकर्षणाद्दूरमग्निं नयति उत्तरे ह्येनि धानविधानादिति। तस्मात् प्राकृतमेव
हि प्रणयनमिति सिद्धान्तः॥ आज्यप्रोक्षणीरुधमेध्मीवाद्याग्निध्राप्रयक्ष्यमाणतो भ्यामनु द्रू

त्येकस्मयेन देहीति॥ पंचवारहीत माज्यं प्रोक्षणी प्रोद्य मोद्य मृत्याघहा वग्नीवो वमहो तारं प्रत्या
हाऽग्निभ्यां प्रो दू पमासाशाभ्या मनुब्रू हीति त्येकस्मयाज देहीत्येतच्च प्रतिप्रस्थाता रं प्रत्याह
।आज्यं चात्र धान्वि प्रपराानेतरं प्रशी॥ डु ति वषे स्वातन्दुक्तां पंचवारहीतंयात्वे प्रोक्षणापक्ष्व अस्मे
स्रुता आपरव कु वित्यात्रस्थाः॥ इध्ममभ्यादृ धत्कपयम नीरूपकल्प पत्राज्य मधि प्रयतिस्रुक्वं च
स्रुचेवसं म्मा पृघोत्पाज्यं पंचवारहीतं त्रस्ती मयहाप्र होमइध्मो भवत्यथो घृंहुतीधमनुपय
हंतुपयमनार था हाऽग्नये प्रक्षिपमाराा यानुब्रू त्येकस्मयान्देहीति प्रक्रमनात॥ तमुपघृंति
हस्ताभ्यां उक्षिपंति। सामर्थ्यप्रामसहायापेक्षं वद्भवचनं तन्नाधर्ुः प्रधानत्वा दग्निमुपघ
घेति। आज्यप्रोक्षणाहीति सामर्थ्यान्योग॥ ह्नौ युंश्चथाहेति प्रेषोऽरकुस्पासाधन पस्यास्यमेक
स्पमारेरवानपापुत्क स्त्वमनुपेध्याहु देहि डहु घेति डछ द्वो यत्रा स्पार्ध गामने प्राचीं दिशं पानय

तिस्यापेती छन्वतलक्षणोऽत्ती पात्यथायुक्तमति स्थिमेनु पश्चाद्देहि उ स्थाताग्निमभुगच्छ
